## संस्कृत वार्ता:

**दिनाङ्क : 13/10/2026**

**सायम् : 06:20**

**आदौ मुख्यवार्ता:**

· प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् वैश्विक-अनिश्चितातानां मध्येऽपि भारतस्य आर्थिक-विकासः सुदृढतया प्रतिष्ठितः, अत्रावसरे नवदिल्ल्यां ब्लूमबर्ग-आर्थिक-मञ्चं असौ सम्बोधितवान्।

· दीपावली-पर्वणः अनन्तरं चयनितेषु पी-टू-एम-व्यवहारेषु एमडीआर-शुल्कं प्रवर्तिष्यते।

· लद्दाखः भारतस्य अभिन्नमङ्गम्, चीनस्य प्रत्याख्यानेन न परिवर्तते यथार्थमिति नवदिल्ल्याः दृढप्रतिपादनम्।

· अन्ताराष्ट्रिय-मुद्रा-कोषेण द्विसहस्रतमस्य षड्विंशतिः-सप्तविंशतिः वर्षाय भारतस्य आर्थिक-विकासानुपातः सप्त-प्रतिशतं यावत् वर्धितः।

· अन्ताराष्ट्रिय-क्रिकेट-समित्या सितम्बर-मासस्य मासोत्कृष्ट-क्रीडक-पुरस्काराय शेफाली-वर्मा शुभमन-गिल इत्येतौ चितौ ।

**अथ वार्ता: विस्तरेण**

**प्रधानमन्त्री-आर्थिकमञ्चः**

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् केन्द्र-सर्वकारेण स्वकीये शासन-दृष्टिकोणे कार्यसंस्कृतौ च सशक्तीकरणाय सामर्थ्यम् इति सिद्धान्तः अङ्गीकृतः।नवदिल्ल्यां ब्लूमबर्ग-न्यू-इकॉनॉमी-फोरम् इति आर्थिक-मञ्चं सम्बोधयता प्रधानमन्त्रिणा प्रतिपादितं यत् जागतिक-अनिश्चितातानां मध्येऽपि भारतस्य आर्थिक-प्रगतिः अतीव दृढावस्थायां अग्रेसरा वर्तते। सः अवोचत् यत् भारतस्य विकासः सामूहिक-प्रगतौ सहभागि-अवसरेषु च आधारितः अस्ति। प्रधानमन्त्री अग्रे अवदत् यत् सर्वकारस्य निरन्तर-प्रयासः अस्ति यत् भारतस्य सामर्थ्यं विश्वस्य अन्य-देशेभ्यः अपि अवसराणां नूतन-द्वाराणि उद्घाटयेत्। सः अवोचत् यत् सामर्थ्यं केवलम् अग्रे गमनस्य

क्षमता नास्ति, अपि तु अन्येषां सशक्तीकरणस्य क्षमता वर्तते। श्रीमोदिना उक्तं यत् वर्तमाने युगे अङ्कीय-शक्तिः अस्य रूपान्तरणस्य प्रमुख-चालक-रूपेण उदिता, या अस्य दृष्टिकोणस्य विस्तारे महतीं भूमिकां निर्वहति अथ च भारते विपुलान् अवसरान् सृजति।

प्रधानमन्त्रिणा प्रतिपादितं यत् यदा कदापि विश्वस्मै स्थिर-स्तम्भस्य आवश्यकता भवति, तदा भारतं स्व-दायित्वम् अनुभूय साहाय्य-हस्तं प्रसारयति। श्रीमोदिना सूचितं यत् अद्य भारते द्विसहस्राधिकानि वैश्विक-क्षमता-केन्द्राणि सन्ति, यानि सम्पूर्ण-विश्वस्य वाणिज्यिक-संस्थाभ्यः सेवाः प्रयच्छन्ति। प्रधानमन्त्री अवोचत् यत् भारतं लोकतन्त्रस्य जननी अस्ति, यत्र शतसंख्याधिकाः भाषाः, प्रायः अशीति-सहस्रं पञ्जीकृतानि समाचारपत्राणि प्रकाशनानि च, सहस्राधिकाः च उपग्रह-दूरदर्शन-वाहिन्यः सन्ति। श्रीमोदिना विशेषतया प्रतिपादितं यत् विगते दशके भारतेन पञ्चविंशति-कोटिजनाः निर्धनरेखातः बहिः निष्कासिताः।

प्रधानमन्त्रिणा नरेन्द्रमोदिना अग्रे उक्तं यत् चतुर्दशाधिक-द्विसहस्रतमात् वर्षात् भारते स्टार्ट-अप्-पारिस्थितिकी-तन्त्रस्य अभूतपूर्वः विस्तारः जातः, यत्र नूतनोद्यमानां संख्या सार्ध-द्विलक्षम् अतीता वर्तते।

**बिम्सटेक-गृहमन्त्री**

नवदिल्ल्यां बङ्गालोपत्यका-बहु-क्षेत्रीय-प्राविधिक-आर्थिक सहयोगोपक्रमस्य प्रथम-गृहमन्त्रि-सम्मेलनं भारतस्य आतिथ्ये सम्पद्यते। इदम् ऐतिहासिकं सम्मेलनम् आतङ्कवादस्य, पारदेशीय-सङ्गठित-अपराधानां, मादक-द्रव्य-तस्कर-जालस्य, मतान्धतायाः, मानव-दुर्व्यापारस्य, अवैध-वित्तीय-प्रवाहाणां अथ च सायबर-आव्हानानां सम्मुखीकरणाय सामूहिक-सङ्कल्पं दृढयति। अत्रावसरे भाषमाणः गृहमन्त्री अमितशाहः अवोचत् यत् बिम्सटेक-सङ्गठनं क्षेत्रीय-एकीकरणाय, आर्थिक-सहयोगाय अथ च सामूहिक-सुरक्षायै प्रमुखमञ्चत्वेन उदितम् अस्ति। सः प्रत्यपादयत् यत् भारतं वसुधैव कुटुम्बकम् इति उदात्त-दर्शनेन प्रेरितं सत् सदैव विश्व-शान्तये मानव-कल्याणाय च प्रतिबद्धं वर्तते। आतङ्कवादं प्रति भारतस्य असहिष्णुतायाः नीतिं प्रतिपादयन् गृहमन्त्री सामूहिक-प्रतिबद्धतायै आह्वानम् अकरोत् यत् अस्मिन् सम्पूर्ण-क्षेत्रे कस्मै अपि आतङ्कवादि-जालाय आश्रय-दानस्य, नियुक्ति-प्रक्रियायाः, प्रशिक्षणस्य, वित्त-पोषणस्य अथवा प्रतिवेशि-देशानां विरुद्धं घातुक-कार्याणि सञ्चालयितुं किमपि स्थानं न दीयेत।

**यूपीआई-एमडीआर**

भारतीय-राष्ट्रिय-भुगतान-निगमेन सामाजिक-सञ्चारपटले संसूचितं यत् यूपीआई अथ सेवा-सञ्चालन-समित्या उत्सव-ऋतुः मनसि निधाय अयं निर्णयः गृहीतः यत् चयनितेषु व्यक्तितः-व्यापारी-व्यवहारेषु एमडीआर-व्यवस्था दीपावली-पर्वणः सद्यः अनन्तरमेव प्रवर्त्येत। निगमेन स्पष्टीकृतं यत् अस्य कृते निश्चित-दिनाङ्कस्य अधिसूचना पृथक्तया निर्गमिष्यते। प्रशासनेन स्पष्टीकृतं यत् सर्वे व्यक्तितः-व्यक्ति व्यवहाराः राशि-सीमा-निरपेक्षाः सन्तः सर्वथा निःशुल्काः एव स्थास्यन्ति। एमडीआर-शुल्कं केवलम् द्विसहस्र-रूप्यकेभ्यः अधिक-मूल्यस्य व्यक्तितः-व्यापारी व्यवहारेषु एव प्रयोज्यं भविष्यति। अनेन प्रायः षण्णवति-प्रतिशतं व्यक्तितः-व्यापारी-व्यवहाराः सर्वथा अप्रभाविताः स्थास्यन्ति। सहैव व्यक्तितः-व्यक्ति-व्यापारी-संवर्गे यूपीआई-क्यू-आर्-कोड् माध्यमेन प्रतिमासं लक्ष-रूप्यक-पर्यन्तं धनं प्राप्नुवन्तः लघु-व्यापारिणः, पथ-विक्रेतारश्च सर्व-व्यवहारेषु शून्य-एमडीआर-लाभं निरन्तरं प्राप्स्यन्ति।

<u>विराम</u>

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते।**

**प्रोमो - सोशल मीडिया**

<u>भारतचीनदेशौ</u>

भारतेन अद्य स्पष्टीकृतं यत् लद्दाख-केन्द्रशासित-प्रदेशः भारतस्य अभिन्नम् अपृथक्करणीयम् अङ्गम् अस्ति, चीन-पक्षस्य न केनापि प्रत्याख्यानेन एतत् यथार्थं परिवर्तयितुं न शक्यम्। लद्दाख-विषये चीन-पक्षेण कृतानां साम्प्रतिक-टिप्पणीनां सन्दर्भे सञ्चार-माध्यमानां प्रश्नानां प्रत्युत्तरं प्रददन् विदेश-मन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अवोचत् यत् गृहमन्त्रालयेन पूर्वं प्रसारिता विज्ञप्तिः स्वयमेव सर्वं स्पष्टीकरोति । तस्याम् उद्घोषणायां निर्दिष्टम् आसीत् यत् लद्दाख-केन्द्रशासित-प्रदेशे स्थितानां अष्टाविंशति-स्थानानां भारतीय-महासर्वेक्षक-विभागस्य आधिकारिक-मानचित्रे प्रामाणिक-स्थान-वैशिष्ट्य-नामभिः सह परिज्ञानं कृतम् अस्ति।

<u>आईएमएफ-वृद्धिः</u>

अन्ताराष्ट्रिय-मुद्रा-कोषेण द्विसहस्रतमस्य षड्विंशतिः सप्तविंशतिः आर्थिक-वर्षाय भारतस्य सकल-घरेलू-उत्पादस्य विकास-अनुपात-पूर्वानुमानं वर्धयित्वा सप्त-प्रतिशतं कृतम्, यत् पूर्वं जुलाई-मासे चतुर्दशांशोत्तर-षट्-प्रतिशतम् आसीत्। संस्थायाः प्रमुख-प्रतिवेदने विश्व-आर्थिक-परिदृश्ये स्पष्टीकृतं यत् इदं संशोधनम् अनुमानात् अपि अधिक-दृढ-आर्थिक-गत्या नम्य-आन्तरिक-याचना-व्यवस्थया अथ च सेवा-क्षेत्रस्य सबल-प्रदर्शनेन सम्भवं जातम्। मुद्रा-कोषानुसारं भारतस्य इयं वृद्धिः अनुकूल-जनाङ्किकीय-लाभांशेन विस्तारशील-देशीयापणेन अथ निरन्तर-संरचनात्मक-परिष्कारैः पोषिता वर्तते। केन्द्रीय-वाणिज्योद्योग-मन्त्रिणा पीयूष-गोयलेन

सप्तविंशत्यधिक-द्विसहस्रतमवर्षाय भारतस्य कृते सप्त-प्रतिशत-वृद्ध्यनुपात-अनुमानस्य स्वागतं कृतम्। मन्त्रिणा प्रतिपादितं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे देशेन कृताः विविधाः मुक्त-व्यापार-सन्धयः वैश्विक-आर्थिक-गतिविधिभ्यः बलं दास्यन्ति अथ च प्रदान-शृङ्खलायाः सुदृढतां पोषयिष्यन्ति।

**<u>कनाडा-विदेशमन्त्री</u>**

कनाडादेशस्य विदेशमन्त्री अनीता आनन्दः अद्यारभ्य द्विदिवसीयायां भारतयात्रायाम् आगमिष्यति। स्वयात्रावधौ सा श्वः विदेशमन्त्रिणा डा. एस्. जयशङ्करेण, कौशलविकास-उद्यमशीलता-मन्त्रिणा जयंत चौधरी इत्यनेन च सह मेलनं करिष्यति। एतदतिरिच्य, भारते कनाडादेशस्य उच्चायुक्तः क्रिस्टोफर कूटर इत्येषः अवदत् यत् कनाडा-देशः प्रस्तावित-मुक्त-व्यापार-सन्धिद्वारा, अधिक-निवेशेन, उभयोः देशयोः मध्ये जनानां वर्धित-सञ्चारमाध्यमेन च भारतेन सह द्वैपाक्षिकव्यापारं सुदृढं कर्तुम् इच्छति।

**<u>नेप ाल-जलाप्लाव ः</u>**

नेपालदेशे सप्ताहान्ते जलाप्लावनेन देशस्य मध्यक्षेत्रे पद-मार्गाः, सेतवः च प्रवहिताः, येन शततोऽप्यधिकाः वैदेशीयाः पदयात्रिणः विभिन्नेषु स्थानेषु निबद्धाः सन्ति। काठमाण्डूतः पश्चिमदिशि प्रायः शत-किलोमीटरमितं दूरे गोरखा-मण्डले अद्य प्रातःकाले जाते भूस्खलनेन द्वादश-वैदेशीयैः सह एकविंशत्यधिक-त्रिशतं यावत् जनाः अधिकारिभिः रक्षिताः।

**<u>ऋतु-विभागः</u>**

भारत-ऋतु-विभागेन अद्य अण्डमान-निकोबार-द्वीपसमूहेषु प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम् अस्ति। आई. एम्. डी. इत्यनेन उक्तं यत् श्वः यावत् जम्मू-कश्मीर-लद्दाख-प्रदेशयोः ओलावृष्ट्या सह प्रचण्डवृष्टिः, मेघगर्जनं च भवितुम् अर्हति।

**<u>महिला-एशिया-कप्</u>**

महिला-एशिया-कप् अथ च एशियन्-क्रीडासु उच्चस्तरीय-स्पर्धासु सर्वश्रेष्ठ-योगदानाय, भारतीय-क्रीडिका शैफाली वर्मा, षड्विंशत्यधिक द्विसहस्रतमवर्षस्य सितम्बर-मासस्य कृते 'आई. सी.सी. महिला-प्लेयर्-आफ्-द-मन्थ् इति घोषिता। अपरपक्षे, भारतीय-दलनायकः शुभमन गिल इत्येषः, वेस्ट्-इण्डीज-दलविरुद्धायां एकदिवसीय-अन्ताराष्ट्रिय-श्रृङ्खलायां तस्य उत्कृष्ट-प्रदर्शनस्य अनन्तरं, पञ्चमं बारं आई. सी. सी.-पुरुष-प्लेयर्-आफ्-द-मन्थ रूपेण नामाङ्कितः।

।। इति वार्ताः ।।